ŚyāmU. **श्यामोपनिषत्** Page. Line.

ॐ क्रीं अथ हैनां [illegible]रन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां शुभघातु-
[illegible]मरेफेन्दिरासमष्टिरूपिणीं [illegible]त्रेगुणमादौ तदनु कूर्चबीजद्वयं व्योम-
[illegible]ष्ठस्वरबिन्दुमेलनरूपं त[illegible] भुवनेशीद्वयं भवतु व्योमज्वलनेन्दिराशून्य-
मेलनरूपं ततो दक्षिणे [illegible]के चेत्यपि ततो मुखबीजसप्तकमुच्चार्य बृहद्भानु-
जायामुच्चरेत् । अयं स [illegible]त्रोत्तमः । य इमां सकृज्जपन् स तु देवेश्वरः ।
स तु विश्वेश्वरः । स तु [illegible]रीश्वरः । स तु सर्वगुरुः । स तु सर्वनमस्यः ।
स तु सर्ववेदैरधीतो भवा[illegible] स सर्वेषु तीर्थेषु स्नातो भवति । स स्वयं सदा-
शिवः । त्रिकोणं त्रिकोण[illegible] त्रिकोणं त्रिकोणं पुनश्चैव त्रिकोणं साष्टपत्रं सकेसरं
[illegible]रैकेण संयुतं तस्मिन्देवीं हल्लेखामध्ये विन्यस्य ध्यायेत् । अभिनवजलद-
[illegible]भा कुटिलदंष्ट्रावराभयखड्गमुण्डसहितहस्ता कालिका ध्येया । काली
[illegible]लिनी कुला कुरुकुल्ला विरोधिनी विप्रचित्तेति बहिः षट्कोणगाः ।
[illegible]उग्रप्रभा दीप्ता नी[illegible]ला घना बलाका मात्रा मुद्रा अमितेति नवकोणगाः ।
[illegible]मरावती माहेश्वरी चामुण्डा वाराही नारसिंही कौमारी चापरा-

जितेत्यष्टपत्रगाः । चतुष्कोणेषु चत्वारो माधवरुद्रविनायकसौराः । दि दिकपालाः । देवीं सर्वाङ्गेणादौ संपूज्य भगोदकेन तर्पणं पञ्चमकारेण पूजनमेतस्याः । एवं द्वित्रिक्रमेण कुर्वाणा मुनयो भवन्ति । नारिमित्रादि-लक्षणमस्यवर्तते । अमुष्या मन्त्रपाठकस्य गतिरस्ति । नान्यस्येह गतिरस्ति । एतस्यास्तारामनोर्दुर्गामनोस्सुन्दरीमनोर्वा सिद्धिरिदानीम् । सर्वाः सुखा भूताः । असिताङ्गी जागर्ति । इमामसिताङ्ग्युपनिषदं योऽधीते अपुत्री पुत्री भवति । योऽन्यस्य वरदो दृष्ट्या जगन्मोहयेत् । गङ्गादितीर्थक्षेत्राणामग्निष्टो-मादियज्ञानां फलभागीयते ।

इत्याथर्वणे सौभाग्यकाण्डे श्यामोपनिषत् समाप्ता